(स्वगतम्) अहो इह छिदाए[8] वि से आढत्त[9]-णिव्वहणे अहिणिवेसो । जदो

पुण्णे पसूण-णिअरेहि ताहिं लुएहिं
खिण्णे सिरीसअ-सिरी-हसिरे करम्मि ।
णेत्तेण किंचि परिकुंचिअ-चंचलेणं
आदेइ मज्झ मण-फुल्लमिअं रसोल्लं ॥ ३५ ॥

(इति सस्पृहमवलोकयति ।)

नायिका—(अधोमुखी)[III] कीस उण अअंडे ऊरू मे वेवंति[10] ।

राजा—(स्वगतम्)

[IV] पत्तेसु मज्झ णअणेसु मुहंबुअं से
पाअंबुअं परिगआ खु अवंग-माला ।

1 K घोलिद व्व. 2 K मञ्जरिव्व. 3 K ललाडंतरे. 4 K संगहआसु°. 5 K लग्गाल, but Kh लग्गाइ. 6 K पुप्फाल. 7 K इयं. 8 K ट्ठिदए. 9 K अढत्त. 10 K वेपन्ति.

I) किं नु खल्वेतं प्रेक्ष्य अदृष्टपूर्वस्यावस्थान्तरस्य[1] पात्रं भवति मे चित्तम् । II) वयस्य[2], नेत्रान्दोलनचालितं इव गलित ईषदीषत् कर्णपूरः, लावण्यद्रुममञ्जरीव[3] लसितः स्वेदो ललाटान्तरे शोभासंग्रहणोत्सुकानीव करे लग्नानि पुष्पाण्यस्याः, तन्मन्ये कुसुमग्रहे मणिना नीता इयमेतेन ॥ ३४ ॥ (...) अहो इह स्थिताया[4] अपि अस्या आरब्धव्यापारे अभिनिवेशः । यतः, पूर्णे[5] प्रसूननिकरैः[6] तस्मिन् लूनैः, खिन्ने शिरीषकश्रीहसनशीले करे[7]। नेत्रेण किंचित्परिकुञ्चितचञ्चलेन, आददाति मम मनःफुल्लमियं रसार्द्रम्[8] ॥ ३५ ॥ III) कस्मात् पुनरकाण्डे ऊरू मे वेपेते[9]। IV) प्राप्तयोर्मम नयनयोर्मुखाम्बुजमस्याः, पादाम्बुजं प्रतिगता खलु कटाक्षमाला । हंसाकुलात् कमलात् कमलान्तरे, भृङ्गच्छटेव

१ K अननुभूत° for अदृष्ट° given by M; M some lacuna. २ K वयस्य पश्य, M a short lacuna. ३ K मञ्जरीविलसितः, M °मञ्जरीव ललितस्स्वेदो निटालान्तरे. ४ K इहागताया. ५ K पूर्णैः, M पूर्णे. ६ K निकरैरस्मिन्, M प्रसूनकरैः तस्मिन्. ७ K शिरीषश्री°, M शिरीषकश्रीभासुरे करे. ८ M रसाभ्रम्. ९ K वेपते,

हंसाउलाउ कमला कमलंतरम्मि
भिंग-च्छडा[1] व परिरेहइ धावमाणा ॥ ३६ ॥

विदूषकः–(राजानं निरीक्ष्य, निर्वर्ण्य, अपवार्य) I)भो वअस्स, ण केवलं लक्खणाइ तुज्झ णअणाइं[2] वि किं वि पेम्म-परवसाइ से अंगं आलिंगंति ।

राजा–(अपवार्य) II)वअस्स, केवलं इमाए जोव्वणुब्भेद-तरंगिणं[3] पुलोएमि । पेक्खदु दाव ।

उद्दंसिअ-थण-कुंभं उम्मज्जंतेण जोव्वण-गएणं[4] ।
कूलंकस-रस-भरिआ सरसि व्व तरंगिआ पवालंगी ॥ ३७ ॥

नायिका–(सविषादम् ,स्वगतम्) III)किं करोमि । ण सक्कुणोमि एत्थ ठाउं ।

देवी–(निर्वर्ण्य, स्वगतम्) IV)अदिट्ठ-पुरुव-जण-दंसणेण इमाए विसादो विअ लक्खीअदि । ता एव्वं दाव । (प्रकाशम्) भद्दे एहि, एत्थ उवविस (इति नायिकां हस्ते गृहीत्वा स्वासनार्धे उपवेशयति ।)

नायिका–(उपविश्य[5]) V)अणुग्गहीद म्हि देवीए रईए । (स्वगतम्) अहो, सुहओ एदाणं समवाओ ।

(नेपथ्ये)

वैतालिकः–VI)जअ जअ तिभुवणेक्क-णाह, लोअ-लोअण-चंद, सुंदेर[6]-मंदाविअ-कंदप्प-माण[7], माणवेअ, सुहाअ सायंतण-संझा[8] होउ देवस्स । अज्ज खु

1 K भिंगझडा. 2 K णअणालुं वि. 3 K जोव्वणंभेदतरङ्गणं पुणेएमि. 4 K °गइंणम्. 5 The stage-direction (स्वगतम्), which I have put at the beginning of the next sentence, is put by K immediately after (उपविश्य). 6 K सुन्दर. 7 K omits माण. 8 K सन्छा होइ.

परिराजते[१] धावमाना ॥ ३६ ॥ I) भो वयस्य, न केवलं लक्षणानि तव नयने अपि किमपि प्रेमवशे अस्या अङ्गमालिङ्गतः[२] । II) वयस्य, केवलममुष्याः यौवनोद्भेदतरङ्गिणं[३] प्रलोकयामि[४] । पश्य तावत्, संदर्शितस्तनकुम्भमुन्मज्जता यौवनगजेन । कूलंकषरसभरिता सरसीव तरङ्गिता प्रवालाङ्गी ॥ ३७ ॥ III) किं करोमि । न शक्नोमि अत्र स्थातुम् । IV) अदृष्टपूर्वजनदर्शनेनास्या विषाद इव लक्ष्यते । तदेवं[५] तावत् । (…) भद्रे[६] एहि, अत्र उपविश । V) अनुगृहीतास्मि देव्या रत्या । (…) अहो सुभग एतेषां समवायः । VI) जय जय त्रिभुवनैकनाथ, लोकलोचनचन्द्र, सौन्दर्यमन्दीकृतकन्दर्पमान, मानवेद[७],

१ M परिराजति. २ K °मालिङ्गितः, M °मालिङ्गति. ३ M °तरङ्गणं. ४ M अवलोकयामि. ५ K आस्तां for तदेवं found in M. ६ M भद्रमुखि for भद्रे. ७ K मानवेत, M मानवेद.

एसा बंधुर-बंधुजीअ-कलिआ-सोहा णिदाहंसुणो
रिंछोली पडिबिंबआण लहरी-वुंदेसु संदीसए ।
सिग्घं ओदरिउं[1] णहाउ दिण-लच्छीए समुद्दोदए
माणिक्केहि मणोहरेहि रइआ सोआण-वीहि व्व से ॥ ३८ ॥

किं च ।

सेरं सेरंधि-सत्थो विलिहइ[2] सिहिणे चित्तलं पत्त-लेहं
रामाणं णेत्त-लच्छी-कसणिअ-रमणाआण-मग्गंतराणं ।
आलक्खिज्जंत-कालाअरु-बहलअरुद्दाम-धूमंधआरो
गेहेसुं देइ मेत्तिं रअणि-मुह-महंतुग्गमाणं तमाणं[3] ॥ ३९ ॥

नायिका–(सानन्दं स्वगतम्)[I)]अहो, सो एव्व एसो जस्स जसं सव्वदा तादो[4] वण्णेदि । (सस्पृहमवलोक्य) सरिसं[5] खु तादस्स वण्णणं ।

देवी–[II)]अय्यउत्त, इमाअं अब्भुद-कण्णआअं बहिणिआअं मिव मे हिअअं सिणिज्झइ । किं च, अभिजाआ खु एसा, ता अंतेउरे एव्व ठाउं उइदा । अणुजाणादु अय्यउत्तो अंतेउरं णेदुं ।

राजा–[III)]देवि, एत्थ किं अहं पुच्छिदव्वो । जं अहिरुइदं[6] देवीए ।

1 K ओदरउं. 2 K विलहक्क for विलिहइ. 3 K दमाणं for तमाणं. 4 K तदो. 5 K सरिढुं for सरिसं. 6 K अहिरुहिदं.

सुखाय सायंतनसंध्या भवतु देवस्य । अद्य खलु, एषा[१] बन्धुरबन्धुजीवकलिकाशोभा निदाघांशोः, श्रेणी[२] प्रतिबिम्बानां लहरीवृन्देषु संदृश्यते । शीघ्रमवतरितुं नभसः दिनै[३]लक्ष्म्याः समुद्रोदके, माणिक्यैर्मनोहरैः रचिता[४] सोपानवीथी वास्याः[५] ॥ ३८ ॥ किं च । स्वैरं सैरन्ध्रीसार्थः[६] विलिखति स्तने चित्रवत्पत्रलेखां, रामाणां नेत्रलक्ष्मीकृष्णीकृतरमणायानमार्गान्तराणाम् । आलक्ष्यमान[७]कालागरुबहलतरोद्दाम[८]धूमान्धकारः, गेहेषु ददाति मैत्रीं रजनीमुखमहदुद्गमानां तमसाम्[९] ॥३९॥ I) अहो[१०] स एव एष यस्य यशः सर्वदा तातः वर्णयति । (...) सदृशं खलु तातस्य वर्णनम् । II) आर्यपुत्र, अमुष्यामद्भुतकन्यकायां[११][१२] भगिन्यामिव मे हृदयं स्निह्यति । किं च, अभिजाता खलु एषा, तदन्तःपुर एव स्थातुमुचिता । अनुजानातु[१३] आर्यपुत्रः अन्तःपुरं नेतुम् । III) देवि, अत्र[१४] किमहं प्रष्टव्यः ।

१ K एषो. २ M रिञ्छोली for श्रेणी. ३ K धन for दिन. ४ K रुञ्चिरा for रचिता. ५ K °वीथीव यस्याः. ६ K °सार्थं. ७ K दह्य° for आलक्ष्य°. ८ K तमोद्दाम. ९ K °मुखे महदुमानन्दमासाम्. १० K अथवा for अहो. ११ M अस्या° for अमुष्या°. १२ K °कन्यायां. १३ M अनुज्ञापयतु. १४ K omits अत्र, M किमहमत्र for अत्र किमहं.

देवी –(उत्थाय) I) एहि भद्दमुहि, अंतेउरं पविसम्ह ।

नायिका – II) आमं[1] । (इत्युत्थाय आत्मगतं नायकं सानुरागं तिर्यक् पश्यन्ती सपरिवारया देव्या सह निष्क्रान्ता ।)

राजा –(सनिर्वेदम्)

III) मज्झम्मि हंत पडिऊण पमोअ-वंझा
संझा कराल-मुह-भीसण-सण्णिवाआ ।
देवाण दाणव-घड[2] व्व दिसाण मज्झं
पीऊस-पाण-विहदिं सहसा करेदि ॥ ४० ॥

(समन्तादवलोक्य) अहवा[3] ।

मुहे राउब्भेओ णअण-सुहओ दीसइ फुडं
णिडालग्गे लग्गे अणसरइ सेए उडुगणो ।
सरोआणं[4] दाणिं[5] अणुकुणइ कोसे सिहिणअं[6]
पिआ[7]-सारिच्छेणं मह फुरइ[8] संझा सुहअरी[9] ॥ ४१ ॥

विदूषकः –(निरूप्य) IV) भो वअस्स, एत्तो[10] खु अम्हाणं तिभुवण-लोहणिज्जा रूविणी अब्भुद-कण्णआ समासादिआ । पुणो[11] किं णिस्सारेण इमिणा मणिणा कज्जं । गहिएसु तंडुलेसु[12] किं तुसेहि करणिज्जं ।

1 K omits आम and adds (उत्थाय) etc., while Kh reads आं (इत्युत्थाय etc.) 2 K घटं पदिसाण मंझ. 3 K omits अहवा. 4 K सरोआणिं. 5 K माणिं, but Kh दाणिं. 6 K सिहिणिअं. 7 K विआ. 8 K पुठइ. 9 K सुहहरी. 10 K एत्ता. 11 K पुणो की णिस्सारेण, Kh पुणो चि किं. 12 K तंसुलेसु.

यदभिरुचितं देव्याः[1] । I) एहि भद्रमुखि, अन्तःपुरं प्रविशावः । II) आम[2] । III) मध्ये हन्त पतित्वा प्रमोद[3]वन्ध्या, संध्या करालमुखभीषणसंनिपाता । देवानां दानवघटेव दशोर्मम, पीयूषपानविहतिं सहसा करोति ॥४०॥ (…) अथवा । मुखे रागोद्भेदः नयनसुभगः दृश्यते स्फुटं, ललाटाग्रे[4] लग्नाननुसरति खेदानुडुगणः । सरोजानामिदानीमनुकरोति कोशान् स्तनं[5], प्रिया[6]सादृश्येन मम स्फुरति संध्या सुखकरी[7] ॥ ४१ ॥ IV) भो वयस्य, एतस्मात्[8] खलु अस्माकं त्रिभुवनलोभनीया[9] रूपिणी अद्भुतकन्यका समासादिता पुनः किं निस्सारेणामुना[10] मणिना कार्यम् । गृहीतेषु तण्डुलेषु किं तुषैः करणीयम् ।

१ K प्रविशामः. २ K omits आम. ३ K श्रीमोद for प्रमोद. ४ M निटालाग्रे for ललाटाग्रे. ५ K कोशस्तनम्, M कोशस्तनं. ६ K श्रिया for प्रिया. ७ K सुखहरी. ८ K इतः for एतस्मात्. ९ M श्लाघनीया for लोभनीया. १० M °णानेन for णामुना.

राजा — [I)]गोसण्ण, मा मा एव्वं । किं इंदिराअं गहिआअं मुउंदेण णाहिणंदीअदि[1] दुद्ध-वारिही । ता उद्धरेहि णं । मणिराअं पुणो वि अम्हाणं अणगण्हिउं देवाराहण-मंदिरे अच्चणत्थं ठाविऊण गच्छम्ह संझं वंदिउं ।

(निष्क्रान्ताः सर्वे ।)

॥ इअं[2] चंदलेहाअं पढमं[3] जवणिअंतरं ॥

1 K °णन्दिअदि. 2 K इअं. 3 K पठमं.

I) गोसंज्ञ, मा मा एवं । किमिन्दिरायां गृहीतायां मुकुन्देन नाभिनन्द्यते दुग्धवारिधिः । तदुद्धर एनम् । मणिराजं[1] पुनरपि अस्माकमनुग्रहीतुं देवाराधनमन्दिरे अर्चनार्थं स्थापयित्वा गच्छावः संध्यां वन्दितुम् ॥

॥ इति चन्द्रलेखायां प्रथमं यवनिकान्तरम् ॥

१ KM put the Daṇḍa after मणिराजं.

[II[1]]

(ततः प्रविशति राजा चामरग्राहिणी च ।)

राजा –(निश्वस्य साशंसम्)

[I)]लज्जा-जंतण-लंछि[2]आ वि सहसा तंसा[3]वलोऊसुआ ।
तं देसं णव-पुंडरीअ-णिअर-च्छण्णं कुणंता खणं ।
संचारा चउरं भमंत-भुमं[4]आ मुद्धा सिणिद्धा[5] अ मं
आणंदंतु पुणो वि केअअ-सिहा-लच्छीणमच्छीण से ॥ १ ॥

चामरग्राहिणी –(स्वगतम्)[II)]अहो, अज्ज वि महाराओ तं मरगअ-उज्जाण-वुत्तंतं एव्व चव्वंतो पव्वायंत-वअण-पंक[6]ओ रुअ-रुइअ-च्छित्तेण चित्तेण किं वि किं वि जंपंतो [7]उल्लिहिओ विअ चिट्ठइ । 3 ता वसंत-वण्णणेण अण्णस्सिं णेमि से माणसं । (प्रकाशं) पेक्खदु दाव महाराओ ।

सूणाहिंतो पिवंतो [8]भमइ महुअरो मंदमंदं मरंदं
चू[9]आहिंतो पडंतो महमहइ स-भंगाणुबंधो सुअंधो ।
मूलाहिंतो हसंतो विलसइ पहिउक्केर-सोओ असोओ
सिं[10]गाहिंतो वलंतो मलअ-सिहरिणो वाइ सीओ अ वाओ ॥२॥

1 K begins this Scene with this sentence: अथ चन्द्रलेखायां द्वितीयं यवनिकान्तरम् ।. 2 K लच्छिआ. 3 K तस्साव°. 4 K भमआ for भुमआ. 5 K सिणिद्धाअमामण्डंदन्तु. 6 K वकुओ for पंकओ. 7 K जप्पंतो उल्लिखितो. 8 K डुमइ महुररो. 9 K चूडाहिंतो, 10 K सोगाहिंतो, but Kh सिंगाहिंतो.

[संस्कृतच्छाया]

I) लज्जायन्त्रणलाञ्[1]छिता अपि सहसा त्र्यस्रावलोकोत्सुकाः, तं देशं नवपुण्डरीकनिकरच्छन्नं कुर्वन्तः क्षणम् । संचाराश्चतुरं भ्रमद्भ्रुवः मुग्धाः स्नि[2]ग्धाश्च माम्, आनन्दयन्तु पुनरपि केतकशि[3]खालक्ष्मिणोः अक्ष्णोः [4]अस्याः ॥ १ ॥ II) अहो, अद्यापि महाराजः तं मरकतोद्यानवृत्तान्तमेव चर्चयन् [5]शुष्यद्वदनपङ्कजो रणरणिकाक्षिप्तेन चित्तेन किमपि कि[6]मपि जल्पन् उल्लिखित इव तिष्ठति । तद्वसन्तवर्णनेन अन्यस्मिन् नयाम्यस्य मानसम् । (...) पश्यतु तावन्महाराजः । सूनेभ्यः पिबन् भ्रमति मधुकरो मन्दमन्दं मकरन्दं, चूतेभ्यः पतन् सर्वतः प्रसरति स[7]भृङ्गानुबन्धः सुगन्धः । मू[8]लात् हसन् विलसति पथिकोत्करशोकः अशोकः, शृङ्गेभ्यः वलमानः मलयशिखरिणः [9]वाति शीतश्च

१ M लक्षिता for लाञ्छिता. २ K स्निग्धागमा° for स्निग्धाश्च मा°. ३ K °शिखालक्ष्म्या अ°. ४ K omits अस्याः. ५ K omits शुष्यद्. ६ K किमपि only once. ७ K प्रसङ्गानुबन्धान् गन्धमूलात्, M भृङ्गानुबन्धैस्सुगन्धैर्मूलाद्धसन् for सभृङ्गा° etc. ८ K पथिकोरकशोकः शृङ्गाद्. ९ K मातरिश्ववातः for वाति etc.

राजा–(अनाकर्ण्य)[I] अहो रूव-सिरी। तह अ।

णेत्तं कंदोट्ट-मित्तं [1]अहर-मणि-सिरी बंधुजीएक्क-बंधू
[2]वाणी पीऊस-वेणी णव-पुलिण-अल-त्थोर-बिंबो णिअंबो।
गत्तं लाअण्ण-सोत्तं घण-सिहिण-[3]भरच्चंत-मुज्झंत-मज्झं
उत्तेहिं किं बहूहिं [4]जिणइ मह चिरा जम्म-फुल्लं [5]फलिल्लं॥ ३॥

एण्हिं च।

सामंतो सो वसंतो लसइ पिअ-वहू-काहलेहिं [6]कलेहिं
आसण्णो एव्व पुण्णा उण [7]सइअ-वरो णट्ठ-तंदो अ चंदो।
णासीरो सो समीरो चलइ मलअदो णेत्त-कोणो अ बाणो
सण्णद्धो [8]सो सिणिद्धो जिणउ तिहुवणं ता असंगो अणंगो॥ ४॥

(विचिन्त्य) अहव जिअं [9]एव्व अणेण [10]अम्हारिस-मम्म-हणणुम्मुहेण वम्महेण तिहुवणं। जदो

महुर-महुरमेदे हंत [11]गाअंति कित्तिं
दिसि दिसि कलअंठा [12]बंदिणो णंदिणो से।
[13]अवि अ गहिअ-गव्वं सव्व-[14]तेल्लोक्क-हेला-
विअअ-[15]धअ-वडाअंदोलिआ बालिआ सा॥ ५॥

1 K अहरसिरी. 2 K पाणी. 3 K भरंचन्त. 4 K जणइ for जिणइ. 5 K हलीलम् for फलिल्लं. 6 K omits कलेहिं. 7 K सइअणट्ठदन्तो अ. 8 K सो जअउ तिहुवणं, but Kh सो सिणिन्धो जिणउ तिहुवणं. 9 K व but Kh एव्व. 10 K मम्महेणणं मुहेणं मम्महेण. 11 K गायन्ति. 12 K वन्दिणे से. 13 K असिअ. 14 K केल्लोक्क. 15 K डअ for धअ.

---

[1]वातः॥ २॥ I) अहो रूपश्रीः। तथा च। नेत्रं नीलोत्पलमित्रम् अधरमणिश्रीर्बन्धुजीवैकबन्धुः, वाणी पीयूषवेणी नवपुलिन[2]तलस्थूलबिम्बो नितम्बः। गात्रं लावण्यस्रोतः घनस्तन[3]भरात्यन्तमुह्यन्मध्यम्, उक्तैः किं [4]बहुभिः जयति मम चिरात् जन्मफुल्लं फलवत्॥ ३॥ इदानीं च। सामन्तः स वसन्तो लसति पिक[5]वधूकाहलैः कलैः, [6]आसन्न एव पुण्यात् पुनः सचिवपरो नष्टतन्द्रश्च चन्द्रः। नासीरः स समीरश्चलति मलयतो नेत्रकोणश्च बाणः, सन्नद्धः स स्निग्धो जयतु त्रिभुवनं [7]तदसंगो अनङ्गः॥ ४॥ (...) अथवा जितमेवानेन अस्मादृशां[8] मर्महननोन्मुखेन मन्मथेन त्रिभुवनम्। यतः, मधुरम[8]धुरमेते हन्त गायन्ति कीर्तिं, दिशि दिशि कलकण्ठाः बन्दिनो नन्दिनोऽस्य। अपि [9]च गृहीतगर्वं सर्व-

१ M वायुः for वातः. २ K पुलिनस्थूल°. ३ M °भारात्यन्तो मु°. ४ M बहुना. ५ K वधूहाहाकलैः कालैः. ६ K आसन्ने and lacuna upto पुनः, M °सन्न and lacuna upto नः सचिव°. ७ K तदङ्गसङ्गम्, M देशमेकोऽनङ्गः for तदसंगो etc. ८ M °मधुरमेके. ९ K च निगृहीत°.

चामरग्राहिणी –(स्वगतम्)[I] अहो, णिअ-सासणेक्क-वसंवदाविअ-सअ-ल-महिअलो[1] हविअ अप्पणा कुसुमसरासणस्स सासणं अणुवट्ट[2]-माणो ण किं वि जाणादि महाराओ । सव्वहा

हरि-हर-सरसिरुहासण-हरिहय-पमुहा मुहा कहिज्जंति ।
णाहो खु[3] णवर एक्को मअणो भुवणाण चोद्दहाणं वि ॥ ६ ॥

राजा –[II] अच्छेरं ।

जं जेहिं णअणंचलेहि तइआ[4] मंदाणिलंदोलिए
पिऊसण्णव-सीअलंबु-लहरी-मज्झम्मि णिम्मज्जिअं ।
[5]तं तेहिं महमेण्हिमुण्ह-विसमे कप्पंत-[6]वादाहए
घोर-क्खेडअ-पूर-पूरिअ-णई-सोत्तम्मि [7]छित्तं मणं ॥ ७ ॥

किं च ।

जाला हेला-विहसिअ-रई लोअणागोअरे सा
बाला ताला-[8]पहुदि परुसा चंदिआ-मंद-वाआ ।
जाला-माला [9]पलअ-सिहिणो पल्लवाली-मुणाली-
माला हालाहलमवि अ कोलाहलो कोइ[10]लाणं ॥ ८ ॥

(विचिन्त्य) किं णु खु वअस्सो मे[11] चिराअदि ।

1 K महिअले, but Kh °लो. 2 K °वट्टमाणेण कीवि जाणादि. 3 K सुरवण एक्को for खु etc. 4 K तइआआ मन्दा°. 5 K तन्तेहीमहमेह्णि°. 6 K वादाहते. 7 K च्छत्तं. 8 K बहुदिवरुत्वा for पहुदि परुसा. 9 K वलय. 10 K कोइदाणम्. 11 K omits मे which is given by Kh.

त्रैलोक्यहेला-, विजय[१]ध्वजपताकान्दोलिता[२] बालिका[३] सा ॥ ५ ॥ I) अहो, निजशासनैक-वशंवदीकृत[४]सकलमहीतलो भूत्वात्मना कुसुमशरासनस्य शासनमनुवर्तमानो न किमपि[५] जानाति महाराजः । सर्वथा, हरिहरसरसीरुहासनहरिहयप्रमुखा मुधा कथ्यन्ते । नाथः खलु परमेको[६] मदनो भुवनानां चतुर्दशानामपि ॥ ६ ॥ II) आश्चर्यम् । यद्यैः[७] नयनाञ्चलैः तदा मन्दानिलान्दोलिते, पीयूषार्णव[८]शीतलाम्बुलहरीमध्ये निमज्जितम् । तत् तैः मम इदानीमुष्णविषमे[९] कल्पान्तवाताहते, घोरक्ष्वेड[१०]कपूरपूरितनदीस्रोतसि क्षिप्तं मनः ॥ ७ ॥ किं च । यदा हेलाविहसित[११]रतिर्लोचनागोचरे सा, बाला तदाप्रभृति परुषाश्चन्द्रिकाम-न्दवाताः । ज्वालामालाः प्रलयशिखिनः पल्लवालीमृणाली-, माला हालाहलमपि च कोला-

१ M विजृंभि for विजय. २ K लोलिता लालिका सा for °दोलिता etc. ३ M बालका. ४ K °वशंवन्दीकृत°, M °वशपदीकृत°. ५ K किमपि विजानाति. ६ M वरमेको. ७ K यद्याभ्यां नयनाञ्चलाभ्यां मन्दा°, M lacuna for तदा. ८ K पीयूषं नव°. ९ K विषमेकान्तवान्तवाता°. १० K घेरक्ष्येलपूरित°, M घोरक्ष्वेड lacuna तार्णव-जले झटित्येव क्षिप्तं मनः । ११ M °विलसिता रति lacuna.

(ततः प्रविशति विदूषकः ।)

विदूषकः–(सहर्षम्)[I)] हंत साहिअं कज्जं । तं[1] वअस्सस्स णिवेदेमि । (परिक्रम्य, पुरोऽवलोक्य) एसो वअस्सो अहिणव-पिअंगु-सामलंगो वि पच्चूस-ससि-मंडल-पंडुर-महुरेहिं अवअवेहिं णिदाह[2]-गंगा-पवाहो विअ कमेण विमुक्क-गभीरत्तणो बहुल-पक्ख-चंदो विअ दिणे दिणे विमुच्चंत-कला-समुदओ तुहिणाअलो[3] व्व विजंभंत-मअणो तं एव्व अब्भुद[4]-कण्णअं झाअंतो थिमिओ चिट्ठइ । (विचिन्त्य) अहो[5] एआरिसाणं वि महापुरुसाणं माणसं मअणेण कीलामिओ[6] कीरइ । सव्वहा मअण-मारुअ-विलोलिअस्स माणसस्स ण को वि पडिआरं[7] करेइ । ता कुसुम-सरासण-सरासार-झरंत-हिअअं वअस्सं सूर-इरण-विसूरंत-कुमुअं व कुमुआअरं सरदिंदु-सुंदर-मुहीए वुत्तंत-चंदिआ-णीसंदेण आणंदेमि । (उपसृत्य) जिणउ[8] भवं ।

राजा –[II)] वअस्स, किं दिट्ठा देवी ।

विदूषकः –[III)] किं दमिलमंडआए पवट्टो सि । उज्जुअं[9] एव्व पुच्छ । किं दिट्ठा तत्थहोदी[10] मणिसंभवेत्ति । किमिणं मूलं[11] मुणंतस्स मम पत्तं

1 K ता for तं. 2 K णिवाह, but Kh णिदाह. 3 K °लोव्वंभंतमअणो. 4 K अब्भुदंणअं, but Kh अब्भुदकण्णअं. 5 K omits अहो. 6 K किलामिओ. 7 K परिआरं. 8 K जणउ भव्वं. 9 K उज्जणीएव्व. 10 K तत्तहोदी. 11 K मूणं मूलत्तस्स.

हलः कोकिलानाम् ॥ ८ ॥ (…) किं नु खलु वयस्यो मे चिरायति । I) हन्त साधितं कार्यम् । तद् वयस्याय[१] निवेदयामि[२] । (…) एष वयस्यः अभिनवप्रियङ्गु[३]श्यामलाङ्गोऽपि प्रत्यूषशशिमण्डलपाण्डुरमधुरैः अवयवैः निदाघगङ्गाप्रवाह इव क्रमेण विमुक्तगम्भीरत्वो बहुलपक्षचन्द्र इव दिने दिने विमुच्यमानकलासमुदयः तुहिनाचल इव विजृम्भमाणमदनः[४] तामेवाद्भुतकन्यकां ध्यायन् स्तिमितस्तिष्ठति । (…) अहो एतादृशानामपि महापुरुषाणां मानसं मदनेन क्रीडामृगः क्रियते । सर्वथा मदनमारुतविलोलितस्य मानसस्य न कोऽपि प्रतीकारं करोति । तत् कुसुमशरासनशरासारसंतप्यमानहृदयं वयस्यं[५] सूर्यकिरणविशुष्यत्कुमुदमिव कुमुदाकरं शरदिन्दुसुन्दरमुख्याः वृत्तान्तचन्द्रिकानिष्यन्देन आनन्दयामि । (…) जयतु भवान् । II) वयस्य, किं दृष्टा देवी । III) किं द्रमिलम[६]ण्डकया प्रवृत्तोऽसि । ऋजुकमेव[७] पृच्छ । किं दृष्टा तत्रभवती[८] मणिसंभवेति । किमिदं मूलं

१ M वयस्यस्य. २ K °यामि इति. ३ K omits प्रियङ्गु, M प्रियं तु. ४ K वदनः for मदनः. ५ K omits वयस्यं, M lacuna. ६ K किं चन्द्रमिलमण्डकया, M lacuna जया प्रवृत्तोऽसि. ७ K व्रज्ये पप्रच्छ for ऋजुकमेव etc. ८ M अत्र भवती.

दंसीअदि, रअण-वेदिणो मंदिरे माणिक्क-मणि त्ति काअं विक्किणी-अदि[1], अणुभूद-बम्हाणंदस्स पुरदो[2] इंदआल-परमत्थदा समत्थी-अदि। किं मए ण मुणिअं मरगआरामादो एव्व तुए देवी-पक्खवादस्स सतिलो[3] सलिलंजली दिण्ण त्ति।

राजा – I)मा मा एव्वं।

जइ वि मणमिमस्सिं कण्णआअं णिबद्धं
तह वि गलइ देवी-पक्खवादो[4] कहं मे।
स-रइ कमलिणीअं दिण्ण-केली-पआरो
विसुमरइ खु णो सो माणसं राअहंसो ॥ ९ ॥

ता आदिदो पहुदि कहेहि[5]।

विदूषकः – II)सुणादु वअस्सो। एसो अहं अंतेउर-वुत्तंतं जाण त्ति तुए पेसिदो गोसम्मि एव्व पत्थिदो फलिहंकणेण[6] गंतुं पवुत्तो।

राजा – III)तदो तदो।

विदूषकः – IV)तदो दूरादो एव्व दिट्ठा मए कं वि[7] कीला-सालभंजिअं गण्हिअ[8] आअच्छंती तमालिआ।

राजा – V)तदो तदो।

विदूषकः – VI)तदो सा मं अपेक्खंती विअ अण्णेण मग्गेण गआ।

राजा – (स्वगतम्) VII)किंणिमित्तं। (प्रकाशं) तदो तदो।

1 K चित्तीणिअदि. 2 K धुरदो. 3 K सतिलो. 4 K पक्खपादो. 5 K कहेदि. 6 K फलिहङ्करेण. 7 K किं वि. 8 K °भञ्जिआं गृह्णिअ आअच्छिती.

जानतः मम[1] पत्रं दृश्यते[2], रत्नवेदिनो मन्दिरे माणिक्यमणिरिति काचो विक्रीयते, अनुभूतब्रह्मानन्दस्य पुरतः इन्द्रजालपरमार्थता समर्थ्यते। किं मया न ज्ञातं मरकतारामादेव[3] त्वया देवीपक्षपातस्य सतिलः सलिलाञ्जलिर्दत्त इति। I) मा मा एवम्। यद्यपि मन अमुष्यां कन्यकायां निबद्धं, तथापि गलति देवीपक्षपातः कथं मे। सरति कमलिन्यां दत्त[4]केलीप्रचारः, विस्मरति खलु नो स[5] मानसं राजहंसः ॥ ९ ॥ तदादितः प्रभृति कथय। II) शृणोतु वयस्यः। एषोऽहं अन्तःपुरवृत्तान्तं जानीहीति त्वया प्रेषितः प्रभाते[6] एव प्रस्थितः स्फटिकाङ्गणेन[7] गन्तुं प्रवृत्तः। III) ततस्ततः। IV) ततो दूरादेव दृष्टा मया कामपि क्रीडाशालभञ्जिकां गृहीत्वा आगच्छन्ती तमालिका। V) ततस्ततः। VI) ततः सा मामपश्यन्तीव[8] अन्येन मार्गेण गता। VII) किंनिमित्तम्। (...) ततस्ततः।

१ K omits मम, M perhaps lacuna. २ K दृश्यते. ३ KM मरतकारा°. ४ K नृत्त for दत्त. ५ K मनो बन्धो for नो स. ६ K omits प्रभाते. ७ M स्फटिकाङ्कणेण. ८ K °पश्यन्तीव अन्येनैव मार्गेण, M °पश्यन्ती चान्येन मा°.

विदूषकः — I) मज्झ अदंसणं अहिलसंतीए किं दंसणेणं ति अहं वि तुण्हि एव्व गंतुमाढत्तो ।

राजा — II) तदो तदो ।

विदूषकः — III) तदो तहिं संमज्जणादि-वावार-केलि-लग्गेण दासेरई-वग्गेण णव-णिहुवण-केलि-सिढिल[1]-बंध-विगलिअंस-घोलंत-पज्जुसिअ-मालई-माला-महमहंत-वहल-परिमल-भर-भमंत-भसल[2]-मंडलेहिं धम्मिल्लेहिं[3] सुरअ-भर-किलम्मंत-चंचलेहिं णअणंचलेहिं थोआवसिट्ठ[4]-पुराण-कत्थूरी-पत्त-भंग-लेहाहिं गंड-लेहाहिं रमण-दिढ-दिण्ण-बिंदु-मणहरेहिं अहरेहिं मंडल-किअ-माणिक्क-मणि-सअल-विण्णास-संका-अर-तंबराअमाण[5]-मणि-माला-दिण्ण-उक्कंठेहिं[6] कंठेहिं वल्लह-णव-णह-दल-विलिहिअ-चंदलेहा-मणोहरेहिं पओहरेहिं मोहण-वेअ-खंडिअ-कंची-गुण-सिढिल-णिअसणेहिं जहणेहिं तुरिअ[7]-विण्णास-महुर-झणझणाअंत-णेउर-कलकल-सुहअ-संचलणेहिं चलणेहिं आअच्छिअ[8] पाडिक्कं एव्व मरगउज्जाण-वुत्तंतं अहं पुच्छिदो ।

राजा — IV) तदो किं तुए पडिवण्णं ।

विदूषकः — V) इमिणा अत्थाण[9]-रअण-खंभेण किं पडिवण्णं । किं

1 K सिडिल. 2 K भमल. 3 K धम्मल्लेहिं. 4 K तोयावसिट्ठ. 5 K °राअमण्णमणि. 6 K ऊकण्ठेहिं. 7 K तुरिय. 8 K आयच्छिअ. 9 K अत्ताणरअणथंभेण.

I) ममादर्शन[1]मभिलषन्त्याः किं दर्शनेनेति अहमपि तूष्णीमेव गन्तुमारब्धः । II) ततस्ततः । III) ततस्तत्र[2] संमार्जनादिव्यापारकेलीलग्नेन दासेरकीवर्गेण[3] नवनिधुवनकेलीशिथिलबन्धविगलितांसघूर्णमानपर्युषितमालतीमालासर्वतःप्रसरद्बहलपरिमलभरभ्रमद्भ्रमर[4]मण्डलैर्मल्लैर्धम्मिल्लैः सुरतभरश्रमक्लाम्यच्चञ्चलैर्नयनाञ्चलैः[5] स्तोकावशिष्टपुराण[6]कस्तूरीपत्रभङ्गलेखाभिर्गण्डरेखाभिः[7] रमणदृढदत्तबिन्दुमनोहरैः अधरैः मण्डलीकृतमाणिक्यमणिशकलविन्यासशङ्काकरताम्रायमाणमणिमालादत्तोत्कण्ठैः कण्ठैः वल्लभनवनखदल[8]विलिखितचन्द्रलेखामनोहरैः पयोधरैः मोहनवेगखण्डितकाञ्चीगुणशिथिलनिवसनैः जघनैः त्वरितविन्यासमधुरझणझणायमाननूपुरकलकलसुभगसंचरणैश्चरणैरागत्य प्रत्येकमेव मरकतोद्यानवृत्तान्तमहं पृष्टः । IV) ततः[9] किं त्वया प्रतिपन्नम् । V) अनेन आस्थानरत्नस्तम्भेन किं प्रतिपन्नम् । किं कस्तूरी पंक्कणे[10] विक्रीयते । किं पुरोडाशं शबराणां[11] दीयते । किं

१ K मम दर्शन°. २ KM ततस्तस्मिन्. ३ K दासीवर्गेण. ४ M °भ्रमद्भसलम°. ५ K °यनानिलैः. ६ M omits पुराण. ७ K लेखाभिः for रेखाभिः. ८ K omits दल. ९ M ततस्त्वया किं प्र°. १० K वक्कणे, M पट्टणे for पक्कणे. ११ K समराणां for शबराणां, M lacuna.

कत्थूरी पक्कणे[1] विक्किणीअदि । किं पुरोलासं समराणं दिज्जइ । किं पंचगव्वं वाअसाणं पडिवज्जीअदि ।

राजा –(सस्मितम्)[I)]अहो विअड्ढदाए[2] विलासो ।

विदूषकः –[II)]किं एत्थ अच्छरीअं । को उण वासस्स[3] लिवि-विण्णासे चित्तीअदि । को वम्मीइणो पद-बंधे कोदुअं करेदि । को बुहप्पइणो छग्गुण[4]-दंसणे विम्हअं गण्हइ ।

राजा –[III)]सच्चं । तदो तदो ।

विदूषकः –[IV)]तदो ताणं ईसा-रज्जु-भमाडिज्जंत-भुमआ-कवणु[5]च्छित्तेहिं चडुल-चडुलेहिं कडक्ख[6]-मरगअ-पासाणेहिं तालिओ । कहं कहं वि तदो संकडादो[7] णिक्कमिअ पदुमराअ-सज्ज-वण-परिअंतेण[8] गदुअ पलित्त-फलिअ-मणि-सिलालिंद-बहल-जोण्हा-जाल-धवलाअंत-दस-दिसा-मुहं माणिक्क-मणि[9]-मंदिरोल्लुसिअ-मंसल-मऊह[10]-माला-बालादव[11]-पल्लविअ-णहंतरं विविह-वावार-तुवरंत-विलासिणी-महुरालाव-कोलाहल-मणहरं अंतेउरं पविट्ठो म्हि ।

राजा –[V)]तदो तदो ।

विदूषकः –[VI)]तदो विद्दुम-मणि-मंडिअ[12]-मंडव-मज्झे पोमराआसण-णिसण्णा देवी, अणंतर-णिहित्ते फलिह-मणि-सिलासणे चंदादवम्मि[13]

1 K पक्कणे. 2 K द्देअड्ढदाए for विअड्ढदाए. 3 K व्वासस्स. 4 K थग्गुण. 5 K ककवणु°. 6 K खडक्ख. 7 K संकटादो. 8 K परतंतेण. 9 K omits मणि. 10 K मऊलह. 11 K पालादव. 12 K omits मंडिअ. 13 K मन्दादिपम्मि.

पञ्चगव्यं वायसानां प्रतिपाद्यते । I) अहो[१] विदग्धतायाः विलासः । II) किमत्राश्चर्यम् । कः पुनर्व्यासस्य लिपिविन्यासे[२] चित्रीयते । को वाल्मीकेः पदबन्धे कौतुकं करोति । को बृहस्पतेः षाड्गुण्यदर्शने विस्मयं गृह्णाति[३] । III) सत्यम् । ततस्ततः । IV) ततस्ता[४]सामीर्ष्यारज्जू[५]भ्राम्यमाणभ्रूकवणोत्क्षिप्तैः चटुलचटुलैः कटाक्षमरकतपाषाणैस्ताडितः । कथंकथमपि ततः सङ्कटान्निष्क्रम्य पद्मरागसर्जवनपर्यन्तेन गत्वा प्रदीप्तस्फटिकमणिशिलालिन्दबहलज्योत्स्नाजाल[६]धवलायमानदशदिङ्मुखं माणिक्यमणिमन्दिरोल्लासिमांसलमयूखमालाबालातपपल्लवितनभोऽन्तरं विविधव्यापारत्वरमाणविलासिनीमधुरालापकोलाहलमनोहरमन्तःपुरं प्रविष्टोऽस्मि । V) ततस्ततः । VI) ततो विद्रुममणिमण्डितमण्डपमध्ये पद्मरागासननिषण्णा देवी, अनन्तरनिहिते स्फटिकमणिशिलासने चन्द्रा-

१ M lacuna हे ते विदग्धताया. २ K लिपिज्ञाने चि°, M कि lacuna विज्ञानेन चि°. ३ K करोति for गृह्णाति. ४ M has a long lacuna after ततस्तासां upto हारितपक्ष etc. (p. 32, l. 49). ५ K °रज्वा for रज्जू°. ६ K omits जाल. ७ K omits मणि°.

बालादव-लच्छि व्व समासीणा सा अब्भुद-कण्णआ, ताणं तंबोल-दाणं कुणंतीओ चंदणिआ-चंदिआओ मए[1] दिट्ठाओ ।

राजा — I)तदो तदो ।

विदूषकः — II)तदो दूरादो एव्व मं दट्ठूण चओरओ आअच्छदि त्ति देवीए कंचणासणं उवणाइअं । तहिं च सुहं णिसण्णो अहं देवीए विअंभंत-चारु-तारुण्ण-सण्णाह-सुहअ-णव-भूसण[2]-वहू-कवोल-पाली-कोमलेहिं तंबोलेहिं हारीद-पक्ख-हरिअ-णिम्मलेहिं पोप्फलेहिं[3] मणहर-वाएहिं[4] पसुवइ-जडा-चंद-खंड-धवलेहिं[5] कप्पूर-सअलेहिं च संभाविओ ।

राजा — III)किं भण्णइ संभावणा-णिवुणत्तणं देवीए ।

विदूषकः — (सेर्ष्यम्) IV)किं एव्वं भणसि । किं णारदे संपत्ते महोण-महिसी[6] ण बहु मण्णइ । किं वसिट्ठे पविट्ठे महुमह-महिला ण सिलाहेइ । किं अरविंद-मंदिरे अब्भागए चंद-सेहर-सुंदरी णाहिणंदेइ ।

राजा — V)जुत्तं एव्व । तदो तदो ।

विदूषकः — VI)तदो ताए अब्भुद-कण्णआए चंदिआ-धवलं मंद-हसिअ-चंदण-चच्चिअं दाऊण णीसंदंत[7]-बहुमाण-मअरंद-सोत्तेहिं णेत्तेहिं कंदोट्ट-मालिआ-मंडणं लंभिओ ।

1 K मआ दिट्ठा, but Kh मए दिट्ठाओ. 2 K हूसण. 3 K फोफलेही. 4 K वाएही, but Kh °वाएहिं उवाएहिं पसु°. 5 K डवलेहिं. 6 K मिहिसी. 7 K णीसन्तबहु°.

तपे बालातपलक्ष्मीरिव समासीना सा अद्भुतकन्यका, तयोस्ताम्बूलदानं कुर्वन्त्यौ चन्दनिकाचन्द्रिके मया दृष्टाः । I) ततस्ततः । II) ततो दूरादेव मां दृष्ट्वा चकोरक आगच्छतीति देव्या काञ्चनासनमुपानीतम् । तस्मिंश्च सुखं निषण्णः अहं देव्या विजृम्भमाणचारुतारुण्यसंनाहसुभगनवभूषणवधूकपोलपालिकोमलैः ताम्बूलैः हारीतपक्षहरितनिर्मलैः पूगफलैः मनोहरपाकैः पशुपतिजटाचन्द्रखण्ड[1]धवलैः कर्पूरशकलैश्च संभावितः । III) किं भण्यते संभावनानिपुणत्वं देव्याः । IV) किमेवं भणसि । किं नारदे संप्राप्ते[2] मघवन्महिषी न बहु मन्यते । किं वसिष्ठे प्रविष्टे मधुमथ[3]महिला न श्लाघते । किमरविन्दमन्दिरे अभ्यागते चन्द्रशेखरसुन्दरी नाभिनन्दति । V) युक्तमेव । ततस्ततः । VI) ततस्तया अद्भुत[4]कन्यकया चन्द्रिकाधवलां मन्दहसितचन्दनचर्चिकां दत्त्वा निष्यन्दमानबहुमान-

१ K omits पूगफलैः and °चन्द्रखण्ड° which are given by M. २ M मघोनो महिषी. ३ M माधव for मधुमथ°. ४ K चाद्भुत for अद्भुत°.

राजा –(तामनुसंधाय)

I) तं णेत्तं तह दीहरं जह भवे अ[1]ण्णो ण कण्णेउरो
बिंबोट्ठाण पहा तहा जह थणा ढिल्लाअरा[2] कुंकुमे ।
वच्छोए तह पंडिमा जह पुरो सुण्णप्पणो[3] दप्पणो
लाअण्णं तह अंगअम्मि जह णो गज्झं णिओलंसुअं[4] ॥ १० ॥

अयि, पुणो वि दिट्ठि-गोअरे भवे ।

विदूषकः – II) भो वअस्स, जावं ण पं[5]म्हुसिमि ताव सव्वं वुत्तंत-सेसं सुणिअ पच्छा जहिच्छं चव्वेहि ।

राजा – III) तदो तदो ।

विदूषकः – IV) तदो तक्कालोइदेहिं [आलावेहिं] कं पि कालं विणोदिऊण[6] देवीए अणुमदो पत्थिदो म्हि ।

राजा –(स्वगतम्) V) ण लद्धो को वि दंसणोवा[7]ओ ।

विदूषकः – VI) किं तदो तदो त्ति ण पुच्छीअदि ।

राजा – VII) वअस्स, चिंतेमि णत्थि दंसणोवाओ त्ति ।

विदूषकः – VIII) पुणो वि किंचि सुणिअ णिरासो होहि ।

राजा – IX) कहेहि ।

विदूषकः – X) तदो मम णिग्गमादो पुरुवं एव्व चंदणिआ जं किंचि[8] भणिअ णिग्गमिअ मग्गे फलिह[9]-पडोहरुप्पर-अग्गे लग्गा आसि ।

1 K अण्णेण कण्णे°. 2 K ढिल्लाअरा. 3 K सुञ्चप्पणो, Kh सुंनप्पणो. 4 K गज्झणिओलोसुणम्. 5 K पंमुसिमि. 6 K विणोदऊण. 7 K दस्सणोवाओ. 8 K किं च. 9 K पलिहपडोहरप्पर.

मकरन्दस्रोतोभ्यां नेत्राभ्यां नीलोत्पलमालिकामण्डनं लम्भितः। I) तन्नेत्रं तथा दीर्घं यथा भवेत् अन्यन्न कर्णपूरं, बिम्बोष्ठयोः प्रभा तथा यथा स्तनौ शिथिलादरौ[1] कुङ्कुमे। वक्षोजे तथा पाण्डुता यथा पुरः शून्यार्पणो दर्पणः, लावण्यं त[2]था अङ्गके यथा नो ग्राह्यं निचोलांशुकम् ॥ १० ॥ अयि, पुनरपि दृष्टिगोचरे भवेत्। II) भो वयस्य, यावन्न प्रस्मरामि तावत् सर्वं वृत्तान्तशेषं श्रुत्वा पश्चात् यथेच्छं चर्वय। III) ततस्ततः। IV) ततस्तत्का[3]लोचितैः आलापैः कमपि कालं विनोद्य[4] देव्यानुमतः प्रस्थितोऽस्मि। V) न लब्धः कोऽपि दर्शनोपायः। VI) किं ततस्तत इति न पृच्छयते। VII) वयस्य, चिन्तयामि नास्ति दर्शनोपाय इति। VIII) पुनरपि किंचित्[5] श्रुत्वा निराशो भव। IX) कथय। X) ततो मम निर्गमात् पूर्वमेव चन्द[6]निका यत्किंचित्

१ K लीलादरौ for शिथिलादरौ. २ K तथा रेणुके यथाग्रेण ग्राह्यं. ३ K °लोचितैर्देव्या आलापैः. ४ K विनोदयित्वा. ५ M किमपि for किंचित्. ६ K चन्दनिकया य°.

राजा –(सप्रत्याशम्) I)तदो तदो ।

विदूषकः – II)तदो मए सह किद-संधी गआ सा ।

राजा –(सस्मितम्) III)केरिसो स संधी ।

विदूषकः – IV)एरिसो । (इति पत्रिकां दर्शयित्वा) एसो तत्थहोदीए[1] अब्भुद-कण्णआए सरस्सई-विलासो अक्खर-विण्णासो अ ।

राजा –(सहर्षमादाय वाचयति ।)

V)को उण कुणइ णिरोहं अवगाहिअ झत्ति पक्खवाद-धुअं ।
इह को वि राअहंसो उक्कलिअं माणसम्मि वड्ढेइ[2] ॥ ११ ॥

(सरोमाञ्चम्)

सवण-उड-गोअरो वि[3] अ फास-सुहाइ व्व झत्ति मह दंतो ।
उप्पुलइअमंगं[4] उप्पल-णअणाअ कुणइ संदेसो ॥ १२ ॥

(पुनरपि द्विस्त्रिर्वाचयति ।)

विदूषकः – VI)भो वअस्स, किं चव्विअ-चव्वणेण । पुणो वि पेक्ख । चंदणिआए[5] वि एत्थ एव्व दुवे सिलोआ कदुअ लिहिआ ।

राजा –(वाचयति ।)

VII)रत्तासोअं[6] वहइ सुरहिं[7] सा वि तं दक्खिऊणं
चंदो मोहं वहइ भुवणे सा वि[8] तेणं णअंगी ।

1 K तत्तहोदीए. 2 K वट्ठेइ. 3 K विअषसहुहाइ. 4 K उप्पुलअमंगं. 5 K चन्दिणिआए. 6 K °सोयं. 7 K सुरही. 8 K विथोणं for वि तेणं.

भणित्वा निर्गम्य मार्गे स्फटिकपश्चाद्भागगृहाग्रे लग्ना आसीत् । I) ततस्ततः । II) ततो मया सह कृतसंधिर्गता सा । III) कीदृशः स संधिः । IV) ईदृशः । (...) एष तत्रभवत्या अद्भुतकन्यकायाः[1] सरस्वतीविलासो अक्षरविन्यासश्च । V) कः पुनः करोति निरोधं अवगाह्य झटिति पक्षपातधुतम्[2], इह कोऽपि राजहंसः उत्कलिकां मानसे वर्धयति[3] ॥ ११ ॥ (...) श्रवणपुटगोचरोऽपि च स्पर्शसुखानीव झटिति मम ददत्[4] । उत्पुलकितमङ्गमुत्पलनयनायाः करोति संदेशः ॥ १२ ॥ VI) भो वयस्य, किं चर्वितचर्वणेन । पुनरपि पश्य । चन्दनिकयापि अत्रैव द्वौ श्लोकौ कृत्वा लिखितौ । VII) रक्ताशोकं[5] बिभर्ति सुरभिं[6] सापि तं दृष्ट्वा, चन्द्रो मयूखं[7] वहति भुवने सापि तेन नताङ्गी[8] ।

१ K कन्यायाः. २ K पक्षवाते धुते, M पक्षपात lacuna. ३ K वर्धयति ॥ इति. ४ K दम्भम् for ददत्. ५ K रक्ताश्लोकं विभक्तः. ६ K सुरभितं, M सुरभिः. ७ K मयूखं मोहमिति च वहति. ८ K सापि नताङ्गी.

सो जीआदो णिवडइ सआ पंचबाणस्स बाणो
पच्छा तेण दलिअ-तणुआ सा वि बाला खणेण ॥ १३ ॥

अवि अ ।

चंडा ते सास-दंडा तह जह सुहआ गिम्ह[2]-वादाण वादा
बाहा[3] तिव्व-प्पवाहा तह जह सअला दिण्ण-मुद्दा समुद्दा ।
देहो वड्ढंत-दाहो तह जह पलउ[4]द्दंड-सूरो[5] उ मारो
कामो किं कादुकामो ण अ उण मुणिमो दूमिआए इमाए ॥१४॥

को उण अप्फंदइ[6] चंदणिअं संदब्भ-सरणीए ।

विदूषकः—I) चंदिआ[7] अप्फंदइ । तिस्से[8] वि सिलोअं पेक्ख ।

राजा—(वाचयति ।)

II) ण चंदो आणंदं कुणइ ण अ कंदोट्ट-कलिआ
ण माअंद[9]-स्संद-प्पअलिअ-मरंदो वि पवणो ।
ण संदो णीसंदो[10] मलअअ-रसाणं[11] वि विसमं
वसंतीए तीए किमिह मुणिमो किं च भणिमो ॥ १५ ॥

अहो सुहओ संदब्भो चंदिआए[12] । (विचिन्त्य) वअस्स, कहं पुण अदिट्ठ-पुरुवासुं चंदणिआ[13]-चंदिआसुं से चंदमुहीए विस्संभो ।

1 K पञ्चो. 2 K गीपवादा, but Kh गिह्म°. 3 K पादा for बाहा. 4 K वलउ°. 5 Kb सूरो तुसारो. 6 K अप्फुन्दइ. 7 K चन्दणिआ. 8 K किस्से. 9 K माअंदपद. 10 K णीसंदे. 11 K मलअसरसाणं. 12 K चन्दणिआए. 13 K चन्दिणिआ°.

स जीवातः[1] निपतति सदा पञ्चबाणस्य बाणः, पश्चात्[2] तेन दलिततनुः सापि बाला क्षणेन ॥ १३ ॥ अपि च । चण्डास्ते श्वासदण्डास्तथा यथा सुभगा ग्रीष्मवातानां[3] व्राताः, बाष्पाः तीव्रप्रवाहास्तथा यथा सकला दत्तमुद्राः समुद्राः । देहो वर्धमान-दाहः तथा यथा प्रलयोद्दण्डसूर्यस्तु[4] मारः, कामः किं कर्तुकामः न च पुनर्जानीमः दूनायाः[5] अमुष्याः ॥ १४ ॥ कः पुनराक्रामति चन्दनिकां संदर्भ[6]सरण्याम् । I) चन्द्रिका[7] आक्रामति । तस्या अपि श्लोकं पश्य । II) न चन्द्र आनन्दं करोति न च नीलोत्प-लकलिका, न माकन्दस्पन्द[8]प्रगलितमरन्दोऽपि पवनः । न सान्द्रो निष्यन्दो मलयजर-सानामपि विषमं, वसन्त्यास्तस्याः किमिह जानीमः किं च भणामः ॥ १५ ॥ अहो सुभगः संदर्भश्चन्द्रिकायाः[9] । (...) वयस्य, कथं पुनरदृष्टपूर्वयोः चन्दनिकाचन्द्रिक-

१ K सापि जीवातः जीवादिति च नियतति, M सभ्यातः for स जीवातः. २ K पश्चात् तौ दलित°. ३ K °वाता न वाता. ४ M °सूर्यस्तुपारः. ५ M दूनयानया. ६ K °निकासन्दर्भसरण्याः. ७ K चन्दनिकामाक्रा°. ८ K °स्पन्दः प्रग°. ९ K °र्भश्चन्दनिकायाः.

विदूषकः—[I)]चंदणिआ भणादि । भट्टिणीए तस्सिं एव्व दिअहे मह बहिणिआ चंदिआ ताए रअणसंभवाए सहित्तणे णिउत्ता[1] । तदो तं एव्व सव्वदा[2] अणुवट्टंती चंदिआ ताए अप्पणो हिअअं विअ विस्संभट्ठाणं[3] आसी । अहं च तिस्से[4] भइणि त्ति सिणेह-पत्तं जाअ त्ति ।

राजा—[II)]जुज्जइ ।

विदूषकः—[III)]पुणो वि ताए किं वि पत्थिअं च[5] । अज्ज खु चंदिआमुहादो अदिसइद-सुर-सुंदरी-गीअं रअणसंभवाए गीअं ति सुणिअ[6] कोदुएण वट्टमाणाए भट्टिणीए महाराअं संकिअ णादिदूरं पोमराआरामं गमिऊण गीअं सोदव्वं त्ति समओ किदो[7] ।

राजा—[IV)]तदो तदो ।

विदूषकः—[V)]तदो दाणिं भट्टिणी रअणसंभवा अ पदुमराआरामं गमिस्संति । तहिं च तुम्हेहिं पेरंत-ठिअस्स बाल[8]-तमालस्स पसरंत-हरिणील-सिला-वेदिआ-मऊह[9]-मालंधआर-मज्झे ठाअव्वं ति ।

राजा—(सप्रमोदम्)[VI)]अम्हाणं इअं[10] अब्भत्थणा ।

विदूषकः—(कर्णं दत्त्वा)[VII)]जेण णूउर-णिणादो सुणीअदि[11] तेण पत्थिआ देवी रअणसंभवा अ पोमराआरामं । ता गच्छम्ह ।

1 K णिवुत्ता. 2 K संवदा. 3 K °दठाणं. 4 K किस्से. 5 K omits च. 6 K सुणुअ. 7 K कओ, but Kh किदो. 8 K वाम for बाल. 9 K मऊहवालंडआर. 10 K इयं. 11 K सुणीहदि.

योरस्याश्चन्द्रमुख्याः विश्रम्भः । I) चन्दनिका भणति । भट्टिन्या तस्मिन्नेव दिवसे मम भगिनी[१] चन्द्रिका तस्या रत्नसंभवायाः सखित्वे नियुक्ता । ततस्तामेव सर्वदा अनुवर्तमाना चन्द्रिका तस्या आत्मनो[२] हृदयमिव विस्रम्भस्थानमासीत् । अहं च तस्या भगिनीति स्नेहपात्रं जाता इति । II) युज्यते । III) पुनरपि तया किमपि प्रार्थितं च । अद्य खलु चन्द्रिकामुखात् अतिशयितसुरसुन्दरीगीतं रत्नसंभवाया गीतमिति श्रुत्वा कौतुकेन वर्तमानया[३] भट्टिन्या महाराजं शङ्कित्वा नातिदूरं पद्मरागारामं गत्वा गेयं श्रोतव्यमिति समयः कृतः । IV) ततस्ततः । V) तत इदानीं भट्टिनी[४] रत्नसंभवा च पद्मरागारामं गमिष्यतः[५] । तस्मिंश्च युवाभ्यां पर्यन्तस्थितस्य बाल[६]तमालस्य प्रसरद्धरिनीलशिलावेदिकामयूख[७]मालान्धकारमध्ये स्थातव्यमिति । VI) अस्माकमियमभ्यर्थना । VII) येन नूपुरनिनादः श्रूयते तेन प्रस्थिता देवी रत्नसंभवा च पद्मरागारामम् ।

१ M भगिनिका च°. २ K हृदयमिवात्मनो for आत्मनो हृदयमिव. ३ K वर्तमानायाः. ४ K omits भट्टिनी. ५ M गमष्भति. ६ M साल for बाल. ७ K लेखालेख for वेदिकामयूख.

राजा—[I]तहा। (उभावुत्थाय परिक्रामतः।)

राजा—(नूपुरश्रवणमभिनीय सहर्षम्)

[II]सो[1]दूण णेउर-रवं दइआअ पाणा
उ[2]ज्जीविआ मह मणोभव-बा[3]ण-खिण्णा।
आरावमंवुअ-कुलाण णिदाह-दाह-
जू[4]राविआ विअ मऊर-गणा कुणंति ॥ १६ ॥

विदूषकः—[III]भो वअस्स, इमाए विलुलिअ-मुउल-कुल-परिमल-भर-तरलअर-भसल-[5]पडल-कलकल-सुहआए वाल-बउल-वाडिआए गच्छम्ह पोमराआराम-पेरंतं। (उभौ परिक्रामतः।)

विदूषकः—[IV]पत्त म्ह पदुमराअ-उज्जाणं। एसो तमालो, एसा इंद-णील-वेदिआ, मऊह-[6]मालंधआरे ता एत्थ उ[7]वविसिअ ठामो।

[8]राजा—[V]तहा। (तथा कुरुतः।)

(ततः प्रविशति देवी नायिका विभवतश्च परिवारः।)

देवी—[VI]भद्दमुहि, पविसम्ह पउमराअ-उज्जाणं।

नायिका—(सनिःश्वासं स्वगतम्)

[VII]विसमो माहव-मासो विल[9]क्खणो एव्व विसमबाणो सो।
अदि-दुलहे अ पेम्मं अहह परं मज्झ ई[10]रिसं [11]कम्मं ॥१७॥

(प्रकाशम्) तह। (सर्वा उद्यानप्रवेशं ना[12]टयन्ति।)

1 K सेदूण. 2 K उग्गीविअं मह. 3 K पाण for बाण. 4 K झराविआ. 5 K पवल. 6 K मालंधआरो. 7 K उपवि°. 8 K adds no consent of the king, but puts the stage direction तथा कुरुतः at the close of Vidūṣaka's speech. 9 K विलक्खणे. 10 K ईसिसं. 11 K कम्म. 12 Kh रूपयन्ति for नाटयन्ति.

तद् गच्छावः। I) तथा। II) श्रुत्वा नूपुररवं दयिता[1]याः प्राणाः, उज्जीवि[2]ता मम मनोभवबाणखिन्नाः। आरावमम्बुदकुलानां निदाघदाह-, संत[3]प्तीकृता इव मयूरगणाः कुर्वन्ति ॥ १६ ॥ III) भो वयस्य, अ[4]मुया विलुलितमुकुलकुलपरिमलभ[5]रतरलतरभ्र[6]मरपटलकलकलसुभगया बालबकुलवाटिकया गच्छावः पद्मरागारामपर्यन्तम्। IV) प्राप्तौ स्वः पद्मरागोद्यानम्। ए[7]ष तमालः, ए[8]षा इन्द्रनीलवेदिका, मयूखमालान्धकारे तद[9]त्रोपविश्य तिष्ठावः। V) त[10]था। VI) भद्रमुखि, प्रविशावः पद्मरागोद्यानम्। VII) विषमो माधवमासः विलक्षण ए[11]व विषमबाणः सः। अतिदुर्लभे च प्रेम अहह परं मम ईदृशं कर्म ॥१७॥

१ M दयितयोः. २ K उज्जीवितं, M उद्दीवितां. ३ M चूर्णी° for संतप्ती°. ४ M अनया. ५ K भरण or भर. ६ KM भसल for भ्रमर. ७ M एष. ८ KM वेदिकामयूखमालान्धकारः. ९ K तत्रोपविश्य, M तदत्र प्रविश्य. १० K omits तथा. ११ K इव for एव.

राजा—(आलोक्य सहर्षम्)[I] हंत ।

पुण्ण-हरिणंक[1]-वअणा फुडंत-णव-पुंडरीअ-दल-णअणा ।
फुरइ मह एत्थ पुरदो पुप्फाउह-पुरुसआर-सामग्गी ॥ १८ ॥

नायिका—(अपवार्य)[II] हला चंदिए, मरगआरामो मणोज्जो[2] । अअं दुक्खअरो[3] । तहिं खु भसल-माला लोअण-रसाअणं[4] उवणेइ, कोइल-जालं कण्णामिअं णीसंदेइ, मलआणिल-परिप्फंदणं चंदण-चच्चं करेइ । एत्थ[5] उण

भसल[6]-पडलं उप्पादग्गिं[7] पअच्छइ लोअणे
गरल-कवलं कण्णाणं मे कुणंति अ कोइला ।
दिसइ विसमं देहे दाहं चलो मलआणिलो
पिअसहि ण तं एक्कं जं मे ण भिंदइ जीविअं ॥ १९ ॥

चन्दनिका—(अपवार्य)[III] विहिणो अणुकूलत्तणे सव्वं ममाणुऊलं, विवरीअत्तणे सव्वं विवरीअं ।

राजा—(सावधानं निरूप्य)[IV] वअस्स, पेक्ख ।

दलिअ-णलिणी-कंदाभोआ कवोलअ-वालिआ
थिमिअ-भुमआ-लेहं णेत्तं[8] पसुत्त-कणीणिअं ।
किमिह बहुणा तिस्से लोलं मिलाण-मुणालिआ-
लुलिअ[9]-लुलिअं गत्तं णेत्तूसवं पसवेइ[10] मे ॥ २० ॥

1 K हरिणपङ्कअवअणा. 2 K मणज्जो. 3 K °अरो खु तहिं खु. 4 K रसायणं. 5 K नायिका—एत्थ उण. 6 K हसल for भसल. 7 K उप्पादग्गी. 8 K लेत्तं for णेत्तं. 9 K लुलुअलुलुअं णेत्तं. 10 K वसवेइ.

(···) तथा । I) हन्त । पूर्णहरिणाङ्कवदना स्फुटन्नवपुण्डरीकदलनयना । स्फुरति ममात्र पुरतः पुष्पायुधपुरुषकारसामग्री ॥ १८ ॥ II) हला चन्द्रिके, मरकतारामो मनोज्ञः । अयं दुःखकरः[१] । तत्र[२] खलु भ्रमर[३]माला लोचनरसायनमुपनयति, कोकिलजालं कर्णामृतं निष्यन्दयति, मलयानिल[४]परिस्पन्दनं चन्दनचर्चां करोति । अत्र पुनः, भ्रमर[५]पटलमुत्पाताग्निं प्रयच्छति लोचने, गरलकवलं कर्णयोः[६] मे कुर्वन्ति च कोकिलाः । दिशति विषमं देहे दाहं चलो मलयानिलः, प्रियसखि न तदेकं यन्मे न भिनत्ति जीवितम् ॥ १९ ॥ III) विधे[७]रनुकूलत्वे सर्वं ममानुकूलं, विपरीतत्वे सर्वं विपरीतम् । IV) वयस्य, पश्य[८] । दलितनलिनीकन्दाभोगा कपोलकपालिका, स्तिमितभ्रूलेखं नेत्रं प्रसुप्तकनीनिकम् । किमिह बहुना तस्याः[९] लोलं[१०] म्लानमृणालिका-, लुलितलुलितं गात्रं नेत्रोत्सवं प्रसूते[११] मे ॥ २० ॥

१ K दुःखतरः. २ K omits तत्र, M कस्मिन् for it. ३ K भसल, M भसळ for भ्रमर. ४ K °निलस्पर्शपरि°. ५ KM भसल for भ्रमर. ६ K कल्याणं for कर्णयोः. ७ M puts this sentence in the mouth of Candrikā. ८ M पश्य पश्य for वयस्य पश्य. ९ K तस्यापि for तस्याः. १० M मुग्ध for लोलं. ११ K वर्धते for प्रसूते.

3 ग्गहण-गव्व-वंचिदे विपंचिए, अगणिज्ज-गुणं[1] अमिअ-गुणाअं इमाए अणुराअंती कहं ण लज्जसि तं[2]। अहव परिवादिणीणं अवआसो णत्थि संकाए। (निर्वर्ण्य) अहह इमाए कंचण-कमणीअंगीए

चलंत-कर-पल्लवं कल-रणंत-तंती-गुणं
वलंत-णअणंचलं मुह-गलंत-दंत-प्पहं।
ललंत-मणि-कुंडलं परिलुलंत[3]-लंबालअं
मणं हरइ मामअं महुर-गीअ-लीलाइदं ॥ २३ ॥

विदूषकः–(निर्वर्ण्य) I)भो वअस्स, अच्छरीअं इमाए चंपअ-दल-कोमलंगीए एक्कमेक्कं वि अंगं लोअण-पीऊस-पूरणं[4]। तह अ।

परिलसिअ-चिउर-माला तिस्से[5] णव-फुल्ल-मल्लिआ-सअला।

राजा–

II)लावण्ण-दिण[6]-सिरीए रेहइ पच्छा स-तारआ रअणी ॥ २४ ॥

विदूषकः–

III)कुडिला[7] अ कुरल-माला परिलोलइ सललिअं णअंगीए।

राजा–

IV)मअणेण तरुण-माणस-बंधण[8]-हरिणील-सिंखला[9] चलिआ ॥२५॥

1 K गणिज्ज for अगणिज्ज. 2 K omits तं given by Kh. 3 K परिलुठन्त. 4 K पारणम् for पूरणं. 5 K किस्से. 6 K सिल for दिण. 7 K कुटिला. 8 K बण्डण. 9 K सीखला.

स्वराणां विशुद्धता। अहो श्रुतीनां विनियोगक्रमः। किं च[1]। कतिपयगुणग्रहणगर्ववञ्चिते विपञ्चिके, अगणनीयगुणामेनामनुगायन्ती[2] कथं न लज्जसे त्वम्। अथवा परिवादिनीनाम[3]वकाशो नास्ति शङ्कायाः। (…) अहह अमुष्याः काञ्चनकमनीयाङ्ग्याः, चलत्करपल्लवं कलरणत्तन्त्रीगुणं, वलमाननयनाञ्चलं[4] मुखगलद्दन्तप्रभम्। ललन्[5]मणिकुण्डलं परिलुल[6]लम्बालकं, मनो हरति मामकं मधुरगीतलीलायितम् ॥ २३ ॥ I) भो वयस्य, आश्चर्यं[7] अस्याश्चम्पकदलकोमलाङ्ग्याः एकैकम[8]प्यङ्गं लोचनपीयूषपूरणम्। तथा च। परिलसितचिकुरमाला तस्या नवफुल्लमल्लिकाशबला[9]। II) लावण्यदिनश्रियो राजते पश्चात् सतारका रजनी ॥ २४ ॥ III) कुटिला[10] च कुरलमाला परिलोलति[11] सललितं नताङ्ग्याः। IV) मदनेन तरुणमानसबन्धनहरिनीलशृङ्खला चलिता ॥ २५ ॥

१ M किं च अपि कति°. २ K अगणितगुणामेतां अनुगुणा अम्मनयन्ती कथं, for अगणनीय etc. given by M. ३ M °वादीनां for °वादिनीनाम्. ४ M लैसन्नयना° for वलमाननयना°. ५ K उत्पलन् for ललन्. ६ K परिस्फुट° for परिलुल°. ७ M पश्य for आश्चर्यं. ८ K एकमेक°. ९ K शकला. १० M कुटिला वकुलमाला. ११ K परिमलति, M परिलोलकिसलयितं.

विदूषकः —

I) सरसिअ-दल-णअणाए सललिअमुण्णामिआ भुमआ ।

राजा —

II) कालिंदी-लहरीणं कंदलिओ एव्व परिभवंकूरो ॥ २६ ॥

विदूषकः —

III) ओदंस-कुवलअं से अवगलिअं किं वि गंड-फलअम्मि ।

राजा —

IV) तरल-णअणंचलेणं तज्जिअमेअं[1] खु होइ हेट्ठ-मुहं ॥ २७ ॥

विदूषकः —

V) किसलअ-मिदुलंगीए गीएण वि लोअणं किलम्मदि से ।

राजा —

VI) कण्णंत-दीह-अत्तं खणेण कादूण दूमिअं[2] एअं ॥ २८ ॥

विदूषकः —

VII) उप्पल-विलोअणाए उम्मिसिअं[3] सम-अलं[4] कवोलेसुं ।

राजा —

VIII) उज्जल-पीऊस-कणा उदंचिआ किंचिं[5] पंचमी-चंदे ॥ २९ ॥

विदूषकः —

IX) परिमलअंति[6] दिसाओ पल्लुव-गत्तीअ सुरहि-णीसासा ।

राजा —

X) तारुण्ण-सुरहि-समए ता पत्ता मलअ[7]-सेल-पवमाणा ॥ ३० ॥

1 K तज्जिअ°. 2 K भूमिअं for दूमिअं. 3 K उम्मिसअं. 4 K सअलं for समअलं. 5 K कञ्चि. 6 K °मलयन्ति. 7 K मलय.

I) सरसिजदलनयनायाः सललितमुन्नामिता[१] भ्रूः । II) कालिन्दीलहरीणां कन्दलित एव परिभवाङ्कुरः[२] ॥ २६ ॥ III) अवतंसकुवलयमस्या अवगलितं किमपि गण्डफलके । IV) तरलनयनाञ्चलेन[३] तर्जितमेतत् खलु भवति अधोमुखम् ॥ २७ ॥ V) किसलयमृदुलाङ्ग्याः गीतेनापि लोचनं क्लाम्यति अस्याः[४] । VI) कर्णान्तदीर्घयात्रां क्षणेन कृत्वा[५] दूनमेतत् ॥ २८ ॥ VII) उत्पलविलोचनायाः उन्मिषितं श्रमजलं[६] कपोलयोः । VIII) उज्ज्वलपीयूषकणाः उदञ्चिताः किंचित् पञ्चमीचन्द्रे ॥ २९ ॥ IX) परिमलयन्ति[७] दिशः पल्लवगात्र्याः सुरभिनिश्वासाः । X) तारुण्यसुरभिसमये तत्प्राप्ताः[८] मलयशैलपवमानाः ॥३०॥

१ K °मुन्नावमितभ्रूः. २ K परिमलाङ्कुरः for परिभवाङ्कुरः of M. ३ K °नयनां चालन, M नयनाञ्चलैस्तर्जित°. ४ K omits अस्याः. ५ K कृत्वा एतत्. ६ K omits श्रमजलं. ७ M विपरिमल°. ८ K तस्मात्प्राप्ता. ९ चंद०

विदूषकः —

I)तरला[1]हर-विवरादो गलंति दंताण चंदिआ-लेसा ।

राजा —

II)गीअ-सु[2]हंबुहि-लहरी-सीअर-णिअरा स-हेलमुल्लसिआ ॥ ३१ ॥

विदूषकः —

III)मह ण णिवट्टइ दि[3]ट्ठी मणहर-वअणंबुआ किसंगीए ।

राजा —

IV)को उण हरेइ णेत्तं सचेअणो पुण्णिमा-चंदा ॥ ३२ ॥

देवी[4] — V)भद्दमुहि, किलम्मए दे वदणं, ता विरमेहि ।

नायिका — VI)तहा[5] । (विरमति ।)

राजा — (सविषादम्) VII)हंत, अवग्गहो सवण-पीऊस-[6]वरिसाणं किदो ।

देवी — VIII)भद्दमुहि, उट्ठेहि गच्छम्ह ।

नायिका — IX)तह ।

(उत्थाय निष्क्रान्ता देवी परिजनश्च ।)

राजा — X)हंत, किदो णेत्त-पीऊस-[7]वरिसाणं च[8] । वअस्स पेक्ख ।

पदुम-वदणाअ दाणिं परिरहिओ पदुमराअ-आरामो ।
अत्थमिअ-चंदलेहो गअणाभोओ व्व होइ णट्ठ-पहो ॥ ३३ ॥

विदूषकः — XI)भो वअस्स, उद्ध[9]रिअ-णिहाणं [10]महिं व इमं उज्झिअ

1 K हरविवराओ for तरला° etc., but Kh तरलाहरविवरादो. 2 K सुहम्बुलहरी. 3 K दिट्टी. 4 K विदूषकः– for देवी. 5 K omits तहा given by Kh. 6 K परिसाणं. 7 K परिसाणं. 8 K has no च. 9 K उद्धारिअ°. 10 K मही इमं उज्झिअ.

I) तरलाधरविवराद्गलन्ति दन्तानां चन्द्रिकालेशा[1]ः । II) गीतसु[2]धाम्बुधिलहरीशीकर-निकराः सहेलमुल्लसिताः ॥ ३१ ॥ III) मम न निवर्तते दृष्टिः मनोहरवदनाम्बुजात् कृशाङ्ग्याः । IV) कः पुनर्हरति नेत्रं सचेतनः पूर्णिमाचन्द्रा[3]त् ॥ ३२ ॥ V) भद्रमुखि, क्लाम्यति ते वदनं, त[4]स्माद् विरम । VI) त[5]था । VII) हन्त[6], अवग्रहः श्रवणपीयूष-वर्षाणां [7]कृतः । VIII) भद्रमुखि, उत्तिष्ठ [8]गच्छावः । IX) तथा । X) हन्त, [9]तथा नेत्र-पीयूषवर्षाणां च । वयस्य, पश्य । पद्मवदनया इदानीं परिरहितः पद्मरागारामः । अस्तमित-चन्द्रलेखः गगनाभोगो भवति नष्टप्रभः ॥ ३३ ॥ XI) भो वयस्य, उद्धृतनिधानां [10]महीं-

१ K keeps blank space for this line. २ K सुधाम्बुलहरी. ३ K चन्द्रः for चन्द्रात्. ४ M °नं तद्विरम. ५ K omits तथा. ६ M अन्तरपग्रह for हन्त अवग्रहः. ७ M जातः for कृतः. ८ K गच्छामः. ९ M omits तथा. १० K महीमिव उज्झित्वा, M निधानमिममुज्झित्वा.

गमिस्सामो । (विलोक्य) वअस्स, एदाओ णत्तमालिआ सालभंजिआ-हत्था [1]तमालिआ अ किं वि [2]सल्लवंतीओ इदो एव्व [3]आअच्छंति । ता एत्थ वि मुहुत्तं णिलुक्का ठाऊण सुणम्ह इमाणं आलावं ।

राजा — I) तह ।

(ततः प्रविशतश्चेट्यौ ।)

एका — II) तमालिए, [4]किमत्था एसा सालभंजिआ ।

द्वितीया — III) [5]सहि णत्तमालिए, सुणाहि आदिदो एव्व ।

नक्तमालिका — IV) तमालिए, अवहिद म्हि ।

तमालिका — V) णत्तमालिए, पुरुवं मरगआरामे चिंतामणि-[6]संभवाअं कण्णआअं किं वि सिणिद्धं पेक्खिअ महाराअस्स दिट्ठिं जं किं वि आसंकमाणाए भट्टिणीए अज्ज पहादे पेसिद म्हि ।

विदूषकः — VI) वअस्स, पहादे दिट्ठस्स सुत्तस्स विवरणं होइ ।

राजा — VII) अवहिदा [7]सुणम्ह ।

नक्तमालिका — VIII) कहं ।

तमालिका — IX) हंजे णत्तमालिए, इमं कस्सीर-णाह-वल्लहाए मह [8]पाहुडीकिदं [9]तत्थभवदीए सारआए पसादेण [10]समासादिअ-धारणा-ववहार-[11]पंडिच्चं बुद्धिमदिं [12]णाम अम्हाअं कीला-सारिअं इमाए साल-

1 K तमालिआ हरिणन्तमालिआ अ. 2 K सल्लपंतीओ. 3 K आअच्छदि. 4 K किं एसा, but Kh किमत्था एसा. 5 K णत्तमालिए सहि for सहि etc. 6 K संभवाकणणआअं. 7 K सुणसुणह्म. 8 K पालडी°, but Kh पाहुडी. 9 K तत्तभवदीए. 10 K समासादिआ धा°. 11 K पाण्डिच्चं. 12 K बुद्धिमदीणाम.

मिव इममुज्झित्वा गमिष्यावः । (...) [1]वयस्य, एते नक्तमालिका शालभञ्जिकाहस्ता तमालिका [2]च किमपि संलपन्त्यौ इत एवागच्छतः । [3]तस्मादत्र अपि [4]मुहूर्तं निर्लक्ष्यं स्थित्वा [5]शृणुवः अनयोरालापम् । I) तथा । II) तमालिके, [6]किमर्था एषा शालभञ्जिका । III) सखि नक्तमालिके, शृणु आदित एव । IV) तमालिके, अवहितास्मि । V) नक्तमालिके, पूर्वं मरकतारामे चिन्तामणिसंभवायां [7]कन्यकायां किमपि स्निग्धां [प्रेक्ष्य] महाराजस्य दृष्टिं यत्किमपि आशङ्कमानया भट्टिन्याद्य प्रभाते प्रेषितास्मि । VI) [8]वयस्य, प्रभाते दृष्टस्य सूत्रस्य विवरणं [9]भविष्यति । VII) अवहितौ [10]शृणुवः । VIII) कथम् । IX) हञ्जे नक्तमालिके, इमां काश्मीरनाथ[11]वल्लभया मे प्राभृतीकृतां कथमत्रभवत्याः शारदायाः प्रसादेन समासादितधारणाव्यवहारपाण्डित्यां [12]बुद्धिमतीं नाम अस्माकं क्रीडाशारिकां अस्याः शाल-

१ M भो मयस्य. २ K omits च. ३ M तदत्र. ४ K एव मूका स्थित्वा for मुहूर्तं etc. ५ K शृणुमः. ६ K किमेषा for किमर्था एषा found in M. ७ M omits कन्यकायां. ८ M भो वयस्य. ९ K वदिष्यति for भविष्यति found in M. १० K शृणुमः. ११ K वल्लभायाः. १२ K बुद्धिमतीनामस्माकं.

भंजिआए कंठ-विवरम्मि ठाविऊण चओरएण सह सल्लवंतस्स अय्य-उत्तस्स अत्थाण-मंडवे [1]सण्णिहिम्मि जह कुह वि [2]छलेण ठावेहि त्ति ।

नक्तमालिका —[I]तदो तदो ।

तमालिका —[II]तदो मए जाव भट्टा देवाराहण-मंदिरा[3]दो ण णिग्गओ [4]ताव च्चिअ एसा सालभंजिआ तहिं एव्व अत्थाण-मंड[5]वे सण्णिहाविआ ।

राजा —[III]वअस्स, वंचिद म्ह ।

विदूषकः —[IV]किं एत्तिएण ।

नक्तमालिका —[V]तदो तदो ।

तमालिका —[VI]तदो दाणिं महाराअं तत्थ असण्णिहिदं जाणिअ सालभंजिअं घेत्तूण आअद म्हि ।

नक्तमालिका —[VII]किं सुदं अवहारिअं वा महाराअस्स वअणं बुद्धिमदीए [6]सालभंजिआए ।

[7]तमालिका —[VIII]सव्वं सुदमवहारिअं च ।

(उभौ हसतः ।)

विदूषकः —[IX]आ दासीए धीदे बुद्धिमदि, तुह कंठं भिं[8]द ।

तमालिका —[X]णत्तमालिए, तुमं पुण कहिं पवुत्ता[9] ।

नक्तमालिका —[XI]भट्टिणीए ण्हाण-वेला आअद त्ति पत्थिद म्हि ।

तमालिका —[XII]ता गच्छम्ह । (इति निष्क्रान्ते ।)

1 K सण्णिहम्मि. 2 K च्छलेण. 3 K मन्दिराहो. 4 K तावच्छिअ. 5 K मण्टपे. 6 K सालभञ्जिआ. 7 K does not present this as the speech of Tamālikā, but adds it to that of Naktamālikā above. 8 Kh छीद for भिंद. 9 K संवुत्ता for पवुत्ता.

भञ्जिकायाः कण्ठविवरे[१] स्थापयित्वा चकोरकेण सह संलपतः आर्यपुत्रस्य आस्थानमण्डपे संनिधौ यत्र कुत्रापि च्छलेन स्थापय इति । I) ततस्ततः । II) ततो मया याव[२]त् भर्ता देवाराधनमन्दिरात् न निर्गतः ता[३]वदेव शालभञ्जिका तस्मिन्नेवास्थानमण्डपे संनिधापिता । III) वयस्य, व[४]ञ्चिताः स्मः । IV) किमेतावता[५] । V) ततस्ततः । VI) तत इदानीं महाराजं तत्रासंनिहितं ज्ञात्वा शालभञ्जिकां गृहीत्वा आगतास्मि । VII) किं श्रुतमवधारितं वा[६] महाराजस्य वचनं बुद्धिमत्या शालभञ्जिकया । VIII) स[७]र्वं श्रुतमवधारितं च । IX) आः दास्याः पुत्रि बुद्धिमति, तव कण्ठं भिन्द्[८] । X) नक्तमालिके, त्वं पुनः कस्मिन् प्रवृत्ता[९] । XI) भट्टिन्याः स्नानवेला आगता इति प्रस्थितास्मि । XII) तद्

१ M कण्ठसिख lacuna; some lacuna in this passage. २ K तावत्, M lacuna. ३ M तावदेवैषा साल°. ४ M वञ्चितोऽस्मि. ५ M अहमेतावता for किमेता°. ६ K च for वा. ७ M puts this speech in the mouth of शारिका. ८ M भिन्धि for भिन्द. ९ M a short lacuna.

(नेपथ्ये)

वैतालिकः – [I)] सुहाअ[1] मज्झम-संझा होइ देवस्स । अज्ज हि
[2] लोलेहिं उप्पलेहिं हिम-जल-मिलिअं चंदणं मंदमंगे
पावंतीओ[3] सुवंते मणिवर-रइए मंदिरे सुंदरीओ ।
तिव्वेहिं आदवेहिं विहुरिअ-हिअओ संसअं[4] राअहंसो
उद्दंडाणं फुडाणं पविसइ सणिअं पुंडरीआण मूलं ॥ ३४ ॥

विदूषकः – [II)] भो वअस्स, किं चिंतिअं[5] मज्झण्हे वट्टइ ।

राजा – [III)] वअस्स, [6] णं इमं एव्व सारिआ-वुत्तंतं चिंतेमि ।

विदूषकः – [IV)] एत्थ का चिंता । णिसग्गदो एव्व दुम्मइणी हु[7] देवी । अज्ज उण सारिआ-वअणं सुणिअ अहिअअरं किं वि पणअ-कलहं करेइ । सा अ तुह[8] दक्खिण्णदाए[9] मिहिर-पहाए[10] तिमिर-पडल-पणासं[11] पाविहिइ ।

राजा – [V)] सव्वहा अंतेउरं एव्व गच्छम्ह ।

(इति निष्क्रान्तौ ।)

॥ इअ चंदलेहाअं दुदिअं[12] जवणिअंतरं ॥

1 K सुहाय. 2 K लोलोहिं. 3 K पावन्तीए, but Kh संदंतीओ. 4 K संसिअं सोअहंसो. 5 K चिन्तीअ. 6 K omits णं given by Kh. 7 K दुम्मइणि उ देवी. 8 K तुठ. 9 K दख्खिणदाए. 10 K वहाए for पहाए. 11 K भणासं for पणासं. 12 K जुदिअं, Kh द्विदीयं.

गच्छावः । I) सुखाय[1] मध्यमसंध्या भवतु, देवस्य । अद्य हि[2], लोलैरुत्पलैर्हिमजलमिलितं चन्दनं मन्दमङ्गे, प्रापयन्त्यः[3] स्वपन्ति मणिवररचिते मन्दिरे सुन्दर्यः[4] । तीव्रैरातपैर्विधुरितहृदयः संश्रयं राजहंसः, उद्दण्डानां स्फुटानां[5] प्रविशति शनैः पुण्डरीकाणां मूलम् ॥ ३४ ॥ II) भो वयस्य, किं चिन्तयित्वा[6] मध्याह्ने वर्तसे । III) वयस्य, इममेव शारिकावृत्तान्तं चिन्तयामि । IV) अत्र का चिन्ता । निसर्गत एव दुर्मतिः खलु देवी । अद्य पुनः शारिकावचनं श्रुत्वा अधिकतरं किमपि[7] प्रणयकलहं करोति । सा च तव दाक्षिण्यतया मिहिरप्रभया तिमिरपटलप्रणाशं[8] प्रापयिष्यते । V) सर्वथा अन्तःपुरमेव गच्छावः ।

॥ इति चन्द्रलेखायां द्वितीयं यवनिकान्तरम् ॥

१ M has good many gaps upto the close of this scene. २ M खलु for हि. ३ K पातंत्स्यन्त्यः, M lacuna. ४ KM सुन्दर्याः. ५ K पुटानां. ६ M चिन्त्यते म°. ७ K omits अधिकतरं किमपि, M lacuna °तरां कलहकोटिं करोति. ८ M पटलीव नाशं.

(ततः प्रविशति राजा विदूषकश्च ।)

राजा –(स्वगतम्)

I)मह [2]खण-संठविओ सो देवी-दिढ-कोव[3]-सेउ-बंधेणं ।
उक्कंठा-णइ-सोत्तो भिण्णो [4]तस्सिं सुदूसहो वहइ ॥ १ ॥

(निश्वस्य) हंत पडिऊलत्तणं भअवदो देवस्स । जदो

[5]उभअमिणमहो समं खु जाअं
मह विरहो अ जणेण [6]वल्लहेणं ।
मदकल-कलकंठ-कामिणीणं
कलकल-हालहलाउलो अ कालो ॥ २ ॥

विदूषकः – II)भो वअस्स, किं वि [7]ऊससिअं होउ दे हिअअं । [8]अइ-वाहिओ खु सो कहं कहं वि पडिदिस-पलित्त-रत्त-कमल-[9]पलआ-
3 णल-जाला-जाल-दुरालोओ जुअ-सहस्स-दीहअरो वासरो, पत्तो अ पप्फुल्ल-विमल-मल्लिआ-फुल्ल-[10]धवलो विअंभणारंभ-णीसरंत-[11]सरस-सीअलामोद-सुहअ-कुमुअ-कोसो पओसो ।

भो पेक्ख सच्छ-महुरो दरमुल्लसंतो
[12]फुल्लुग्गमो अणह-पल्लव-मल्लिआणं ।

1 K begins the Scene with this sentence: अथ तृतीयं यवनिकान्तरम् ।. 2 K घणसट्टविओ. 3 K ends the first line thus: कोपसेउबन्धउक्कण्ठा ।. 4 K तस्सी. 5 K अवहमिण°. 6 K वल्लहेण. 7 K सारसिअं, but Kh ऊससिअं. 8 K अतिवाहितो. 9 K पलआणिल. 10 K °द्धवलो. 11 K सरसी. 12 K फुल्लङ्गमोअणपअल्लुमल्लिआणं.

[संस्कृतच्छाया]

I) मम [1]क्षणसंस्थापितं तत् देवीदृढकोप[2]सेतुबन्धेन । उत्कण्ठानदीस्रोतः भिन्ने तस्मिन् सुदुस्सहो वहति ॥ १ ॥ (···) हन्त, प्रतिकूलत्वं भगवतो दै[3]वस्य । यतः, उभय[4]मिदमहो समं खलु जातं, मम विरहश्च जनेन वल्लभेन । मदकलकलकण्ठकामिनीनां, कलकल[5]हालहलाकुलश्च कालः ॥ २ ॥ II) भो वयस्य, किमपि उच्छ्[6]वसितं भवतु ते हृदयम् । अतिवाहितः खलु स कथं कथमपि प्रतिदिशाप्रदीप्तरक्तकमलप्र[7]लयानलज्वालाजालदुरालोकः युगसहस्रदीर्[8]घतरो वासरः, प्राप्तश्च प्र[9]फुल्लविमलमल्लिकाफुल्लधवलः विजृम्भमाणारम्भनिस्सरत्सरसशीतलामोदसुभगकु[10]मुदकोशः प्रदोषः । भोः [11]पश्य स्वच्छमधुरो दरोल्ल-

१ K क्षणं for क्षण. २ K कोपबन्धनोत्कण्ठा नदीस्रोतसः विभियेन्न तस्मिन्. ३ KM देवस्य. ४ M उदय° for उभय°. ५ M हल° for हाल°. ६ K आश्वासितं for उच्छ्वसितं. ७ K प्रलयानिल. ८ M दीर्घो वासरः. ९ K प्रोत्फुल्ल. १० K कुमुदाशोकः. ११ K पश्य सकलासु, so it has a lacuna; M °फुल्लोत्करप्रचलति मल्लिकानाम्.

दिण्णो दिसासु सअलासु भविस्स-जोण्हा-
सण्णाह-बीअ-णिअरो व्व पओसएणं ॥ ३ ॥

राजा –(सोद्वेगं)[I] किं एव्वं भणासि । पअङ्वंत-मअ-रोस-दूसह-दुट्ठ-दुग्घुट्ट-विसाण-कोणादो कहं वि मोइदस्स कराल-दिढ-दाढा-वेढ-संकड-विसंकड-सीह-मुह-कुहर-विवर-प्पवेसो किं पाण-रक्खणोवाओ । पेक्ख दाव ।

कुमुअ-णिअर-घोलंतालि-रिंछोलि-पासो
दलिअ-धवल-मल्ली-फुल्ल-सोहट्टहासो ।
अहिसरइ पुरिल्लो मं पओसाहिधाणो
घणतम-तम-कालो हंत कालो करालो ॥ ४ ॥

किं मे सरणं ।

विदूषकः –[II] वअस्स, चंदणिआए वअणं सरणं ।

राजा –(सप्रत्याशम्)[III] वअस्स, किं तं चंदणिआए वअणं ।

विदूषकः –[IV] सुणादु वअस्सो । अहं खु एण्हिं तुए पसादिआए देवीए सेवणं कादूण णिवट्टमाणो मग्गे तत्थहोदीए रअणसंभवाए मअण-वेअणा-विणोअणत्थं चंदणारविंद-कंदोट्ट-चंदोज्जअ-चंदमणि-मोत्तिअ-मुणाल-वलअ-कअली-कप्पूर-पुरस्सरं सिसिरोवआर-सामग्गिं संपादअंतीए चंदणिआए घडिदो म्हि ।

1 K जोह्णसण्णाह. 2 K पिअङ्वंत. 3 K दुब्बट्ट. 4 K संकडविसंकढ. 5 K फुरिल्लो. 6 K often reads चन्दिणिआ for चन्दणिआ. 7 K पसादिआहि. 8 K तत्तहोदीए. 9 K विणोअणवत्थं. 10 K चन्दज्जोअचन्दमोणिमोक्खिअ. 11 K °रोपसारसामग्गीं.

सन्, फुल्लोद्गमो अनघपल्लवमल्लिकानाम् । दत्तः दिशासु सकलासु दिशासु भविष्यज्ज्योत्स्ना-, सन्नाहबीजनिकर इव प्रदोषकेन ॥ ३ ॥ I) किमेवं भणसि । प्रवर्धमानमदरोषदुस्सह-दुष्टवारणविषाणकोणात्कथमपि मोचितस्य करालदृढदंष्ट्रावेष्टसंकटविशंकटसिंहमुखकुहर-विवरप्रवेशः किं प्राणरक्षणोपायः । पश्य तावत् । कुमुदनिकरघूर्णमानालिश्रेणिपाशः, दलितधवलमल्लीफुल्लशोभाट्टहासः । अभिसरति पुरतो मां प्रदोषाभिधानो, घनतमतमः-कालः हन्त कालः करालः ॥ ४ ॥ किं मे शरणम् । II) वयस्य, चन्दनिकायाः वचनं शरणम् । III) वयस्य, किं तत् चन्दनिकाया वचनम् । IV) शृणोतु वयस्यः । अहं खल्विदानीं त्वया प्रसादितायाः देव्याः सेवनं कृत्वा निवर्तमानो मार्गे तत्रभवत्या रत्नसंभवाया मदनवेदनाविनोदनार्थं चन्दनारविन्दनीलोत्पलकुमुदचन्द्रमणिमौक्तिकमृणालवलयकदलीकर्पूरपुरस्सरां शिशिरोपचारसामग्रीं संपादयन्त्या चन्दनिकया घटितोऽस्मि ।

